श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.11- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**
**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**
**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**
**एकादशः स्कन्धः**
**॥ अथैकादशोऽध्यायः ॥**

**ŚrīmadBhāgawatamahāpurāṇam**
**Ekādaśḥ skandhaḥ**
**.. Athaikādaśo'dhyāyaḥ ..**

### श्रीभगवानुवाच

**बद्धो मुक्त इति व्याख्या, गुणतो मे न वस्तुतः ।**
**गुणस्य मायामूलत्वान्- न मे मोक्षो न बन्धनम् ॥ 1॥**

śrībhagavānuvāca

baddho mukta iti vyākhyā, guṇato me na vastutaḥ .

guṇasya māyāmūlatvān- na me mokṣo na bandhanam .. 1..

māyā+ mūlat+ vān

शोकमोहौ सुखं(म्) दुःखं(न्), देहापत्तिश्च मायया ।

स्वप्नो यथाऽऽत्मनः(ख्) ख्यातिः(स्), सं(व्)सृतिर्न तु वास्तवी ॥ 2॥

śokamohau sukhaṃ(m) duḥkhaṃ(n), dehāpattiśca māyayā .

svapno yathā''tmanaḥ(kh) khyātiḥ(s), saṃ(v)sṛtirna tu vāstavī .. 2..

dehāpat+ tiśca, saṃ(v)sṛtir+ na

विद्याविद्ये मम तनू , विद्ध्युद्धव शरीरिणाम् ।

मोक्षबन्धकरी आद्ये, मायया मे विनिर्मिते ॥ 3॥

vidyāvidye mama tanū, viddhyuddhava śarīriṇām .

mokṣabandhakarī ādye, māyayā me vinirmite .. 3..

vid+ dhyud+ dhava

एकस्यैव ममां(व्)शस्य, जीवस्यैव महामते ।

बन्धोऽस्याविद्ययानादिर्- विद्यया च तथेतरः ॥ 4॥

ekasyaiva mamāṃ(v)śasya, jīvasyaiva mahāmate .

bandho'syāvidyayānādir- vidyayā ca tathetaraḥ .. 4..

bandho's+ yāvidyayā+ nādir

अथ बद्धस्य मुक्तस्य, वैलक्षण्यं(म्) वदामि ते ।

विरुद्धधर्मिणोस्तात, स्थितयोरेकधर्मिणि ॥ 5॥

atha baddhasya muktasya, vailakṣaṇyaṃ(m) vadāmi te .

viruddhadharmiṇostāta, sthitayorekadharmiṇi .. 5..

viruddha+ dharmiṇos+ tāta, sthita+ yore+ kadharmiṇi

सुपर्णावेतौ सदृशौ सखायौ,
यदृच्छयैतौ कृतनीडौ च वृक्षे ।
एकस्तयोः(ख्) खादति पिप्पलान्न-
मन्यो निरन्नोऽपि बलेन भूयान् ॥ 6॥

suparṇāvetau sadṛśau sakhāyau
yadṛcchayaitau kṛtanīḍau ca vṛkṣe .
ekastayoḥ(kh) khādati pippalānna-
manyo niranno'pi balena bhūyān .. 6..

suparṇā+ vetau, yadṛc+ chayaitau,
pip+ palān+ na, niran+ no'pi

आत्मानमन्यं(ञ्) च स वेद विद्वा-
नपिप्पलादो न तु पिप्पलादः ।
योऽविद्यया युक् स तु नित्यबद्धो,
विद्यामयो यः(स्) स तु नित्यमुक्तः ॥ 7॥

ātmānamanyaṃ(ñ) ca sa veda vidvā-
napippalādo na tu pippalādaḥ .
yo'vidyayā yuk sa tu nityabaddho
vidyāmayo yaḥ(s) sa tu nityamuktaḥ .. 7..

ātmā+ namanyaṃ(ñ), napip+ palādo

देहस्थोऽपि न देहस्थो, विद्वान् स्वप्नाद् यथोत्थितः ।
अदेहस्थोऽपि देहस्थः(ख्), कुमतिः(स्) स्वप्नदृग् यथा ॥ 8॥

dehastho'pi na dehastho, vidvān svapnādyathotthitaḥ .
adehastho'pi dehasthaḥ(kh), kumatiḥ(s) svapnadṛg yathā .. 8..

adehas+ tho'pi

इन्द्रियैरिन्द्रियार्थेषु , गुणैरपि गुणेषु च ।
गृह्यमाणेष्वहं(ङ्)कुर्यान्- न विद्वान् यस्त्वविक्रियः ॥ 9॥

**indriyairindriyārtheṣu, guṇairapi guṇeṣu ca .**
**gṛhyamāṇeṣvahaṃ(ṅ)kuryān -na vidvān yastvavikriyaḥ .. 9..**

indriyai+ rindri+ yārtheṣu, gṛhya+ māṇeṣ+ vahaṃ(ṅ)+ kuryān, yastva+ vikriyaḥ

दैवाधीने शरीरेऽस्मिन्, गुणभाव्येन कर्मणा ।
वर्तमानोऽबुधस्तत्र, कर्तास्मीति निबद्ध्यते ॥ 10॥

**daivādhīne śarīre'smin, guṇabhāvyena karmaṇā .**
**vartamāno'budhastatra, kartāsmīti nibaddhyate .. 10..**

vartamāno'+ budhas+ tatra, nibad+ dhyate

एवं(म्) विरक्तः(श्) शयने, आसनाटनमज्जने ।
दर्शनस्पर्शनघ्राण- भोजनश्रवणादिषु ॥ 11॥

**evaṃ(m) viraktaḥ(ś) śayane, āsanāṭanamajjane .**
**darśanasparśanaghrāṇa- bhojanaśravaṇādiṣu .. 11..**

āsanā+ ṭana+ majjane, darśana+ sparśa+ naghrāṇa, bhojana+ śravaṇā+ diṣu

न तथा बद्ध्यते विद्वां(व्)स्- तत्र तत्रादयन् गुणान् ।
प्रकृतिस्थोऽप्यसं(व्)सक्तो, यथा खं(म्) सवितानिलः ॥ 12॥

**na tathā badhyate vidvāṃ(v)s- tatra tatrādayan guṇān .**
**prakṛtistho'pyasaṃ(v)sakto, yathā khaṃ(m) savitānilaḥ .. 12..**

prakṛtistho'+ pyasaṃ(v)sakto

वैशारद्येक्षयासं(ङ्)ग- शितया छिन्नसं(व्)शयः ।
प्रतिबुद्ध इव स्वप्नान्- नानात्वाद् विनिवर्तते ॥ 13॥

**vaiśāradyekṣayāsaṃ(ṅ)ga- śitayā chinnasaṃ(v)śayaḥ .**
**pratibuddha iva svapnān- nānātvād vinivartate .. 13..**

vaiśā+ radyekṣayā+ saṃ(ṅ)ga, chin+ nasaṃ(v)śayaḥ

यस्य स्युर्वीतसं(ङ्)कल्पाः(फ्), प्राणेन्द्रियमनोधियाम् ।
वृत्तयः(स्) स विनिर्मुक्तो, देहस्थोऽपि हि तद्गुणैः ॥ 14॥

yasya syurvītasaṃ(ṅ)kalpāḥ(ph), prāṇendriyamanodhiyām .
vṛttayaḥ(s) sa vinirmukto, dehastho'pi hi tadguṇaiḥ .. 14..

syur+ vīta+ saṃ(ṅ)kalpāḥ(ph), prāṇendriya+ manodhiyām, dehas+ tho'pi

यस्यात्मा हिं(व्)स्यते हिं(व्)स्रैर्- येन किं(ञ्)चिद् यदृच्छया ।
अर्च्यते वा क्वचित्तत्र, न व्यतिक्रियते बुधः ॥ 15॥

yasyātmā hiṃ(v)syate hiṃ(v)srair- yena kiṃ(ñ)cid yadṛcchayā .
arcyate vā kvacittatra, na vyatikriyate budhaḥ .. 15..

hiṃ(v)s+ rair, kvacit+ tatra, vyati+ kriyate

न स्तुवीत न निन्देत, कुर्वतः(स्) साध्वसाधु वा ।
वदतो गुणदोषाभ्यां(म्), वर्जितः(स्) समदृङ्मुनिः ॥ 16॥

na stuvīta na nindeta, kurvataḥ(h) sādhvasādhu vā .
vadato guṇadoṣābhyāṃ(m), varjitaḥ(s) samadṛṅmuniḥ .. 16..

न कुर्यान्न वदेत् किं(ञ्)चिन्- न ध्यायेत् साध्वसाधु वा ।
आत्मारामोऽनया वृत्त्या, विचरेज्जडवन्मुनिः ॥ 17॥

na kuryānna vadetkiṃ(ñ)cin- na dhyāyet sādhvasādhu vā .
ātmārāmo'nayā vṛttyā, vicarejjaḍavanmuniḥ .. 17..

sādhva+ sādhu, ātmā+ rāmo'+ nayā, vicarej+ jaḍa+ vanmuniḥ

शब्दब्रह्मणि निष्णातो, न निष्णायात् परे यदि ।
श्रमस्तस्य श्रमफलो, ह्यधेनुमिव रक्षतः ॥ 18॥

śabdabrahmaṇi niṣṇāto, na niṣṇāyāt pare yadi .
śramastasya śramaphalo, hyadhenumiva rakṣataḥ .. 18..

śabda+ brahmaṇi, hyadhe+ numiva

**गां(न्) दुग्धदोहामसतीं(ञ्) च भार्यां(न्),**

**देहं(म्) पराधीनमसत्प्रजां(ञ्) च ।**

**वित्तं(न्) त्वतीर्थीकृतमं(ङ्)ग वाचं(म्),**

**हीनां(म्) मया रक्षति दुःखदुःखी ॥ 19॥**

**gāṃ(n) dugdhadohāmasatīṃ(ñ) ca bhāryāṃ(n)**

**dehaṃ(m) parādhīnamasatprajāṃ(ñ) ca .**

**vittaṃ(n) tvatīrthīkṛtamaṃ(ṅ)ga vācaṃ(m)**

**hīnāṃ(m) mayā rakṣati duḥkhaduḥkhī .. 19..**

dugdhadohā+ masatīṃ(ñ), parādhī+ namasat+ prajāṃ(ñ), tvatīrthī+ kṛtamaṃ(ṅ)ga

**यस्यां(न्) न मे पावनमं(ङ्)ग कर्म,**

**स्थित्युद्भवप्राणनिरोधमस्य ।**

**लीलावतारेप्सितजन्म वा स्याद्-**

**वन्ध्यां(ङ्) गिरं(न्) तां(म्) बिभृयान्न धीरः ॥ 20॥**

**yasyāṃ(n) na me pāvanamaṃ(ṅ)ga karma,**

**sthityudbhavaprāṇanirodhamasya .**

**līlāvatārepsitajanma vā syād-**

**vandhyāṃ(ṅ) giraṃ(n) tāṃ(m) bibhṛyānna dhīraḥ .. 20..**

sthityud+ bhavaprāṇa+ niro+ dhamasya, līlā+ vatārep+ sitajanma

**एवं(ञ्) जिज्ञासयापोह्य, नानात्वभ्रममात्मनि ।**

**उपारमेत विरजं(म्), मनो मय्यर्प्य सर्वगे ॥ 21॥**

**evaṃ(ñ) jijñāsayāpohya, nānātvabhramamātmani .**

**upārameta virajaṃ(m), mano mayyarpya sarvage .. 21..**

jijñāsayā+ pohya, nānātva+ bhrama+ mātmani, mayyar+ pya

यद्यनीशो धारयितुं(म्), मनो ब्रह्मणि निश्चलम् ।
मयि सर्वाणि कर्माणि, निरपेक्षः(स्) समाचर ॥ 22॥

yadyanīśo dhārayituṃ(m), mano brahmaṇi niścalam .
mayi sarvāṇi karmāṇi, nirapekṣaḥ(s) samācara .. 22..

श्रद्धालुर्मे कथाः(श्) शृण्वन्, सुभद्रा लोकपावनीः ।
गायन्ननुस्मरन् कर्म, जन्म चाभिनयन् मुहुः ॥ 23॥

śraddhālurme kathāḥ(ś) śṛṇvan, subhadrā lokapāvanīḥ .
gāyannanusmaran karma, janma cābhinayan muhuḥ .. 23..

gāyan+ nanu+ smaran

मदर्थे धर्मकामार्था- नाचरन् मदपाश्रयः ।
लभते निश्चलां(म्) भक्तिं(म्), मय्युद्धव सनातने ॥ 24॥

madarthe dharmakāmārthā- nācaran madapāśrayaḥ .
labhate niścalāṃ(m) bhaktiṃ(m), mayyuddhava sanātane .. 24..

mayyud+ dhava

सत्सं(ङ्)गलब्धया भक्त्या , मयि मां(म्) य उपासिता ।
स वै मे दर्शितं(म्) सद्भि- रं(ञ्)जसा विन्दते पदम् ॥ 25॥

Satsaṃ(ṅ)galabdhayā bhaktyā, mayi māṃ(m) ya upāsitā .
sa vai me darśitaṃ(m) sadbhi- raṃ(ñ)jasā vindate padam .. 25..

Satsa**ṃ**(**ṅ**)ga+ labdhay**ā**

उद्धव उवाच

साधुस्तवोत्तमश्लोक, मतः(ख्) कीदृग्विधः(फ्) प्रभो ।
भक्तिस्त्वय्युपयुज्येत, कीदृशी सद्भिराद‍ृता ॥ 26॥

uddhava uvāca

sādhustavottamaśloka, mataḥ(kh) kīdṛgvidhaḥ(ph) prabho .
bhaktistvayyupayujyeta, kīdṛśī sadbhirādṛtā .. 26..

sadhus+ tavot+ tamaśloka, kīdṛg+ vidhaḥ(ph),
bhaktis+ tvayyupa+ yujyeta, sad+ bhirā+ dṛtā

एतन्मे पुरुषाध्यक्ष, लोकाध्यक्ष जगत्प्रभो ।
प्रणतायानुरक्ताय, प्रपन्नाय च कथ्यताम् ॥ 27॥

etanme puruṣādhyakṣa, lokādhyakṣa jagatprabho .
praṇatāyānuraktāya, prapannāya ca kathyatām .. 27..

praṇatāyā+ nuraktāya

त्वं(म्) ब्रह्म परमं(म्) व्योम, पुरुषः(फ्) प्रकृतेः(फ्) परः ।
अवतीर्णोऽसि भगवन्, स्वेच्छोपात्तपृथग्वपुः ॥ 28॥

tvaṃ(m) brahma paramaṃ(m) vyoma, puruṣaḥ(ph) prakṛteḥ(ph) paraḥ .
avatīrṇo'si bhagavan, svecchopāttapṛthagvapuḥ .. 28..

sveccho+ pāt+ taṛthag+ vapuḥ

श्रीभगवानुवाच

कृपालुरकृतद्रोहस्- तितिक्षुः(स्) सर्वदेहिनाम् ।
सत्यसारोऽनवद्यात्मा, समः(स्) सर्वोपकारकः ॥ 29॥

śrībhagavānuvāca

kṛpālurakṛtadrohas- titikṣuḥ(s) sarvadehinām .
satyasāro'navadyātmā, samaḥ(s) sarvopakārakaḥ .. 29..

kṛpālu+ rakṛta+ drohas, satyasāro'+ navadyātmā, sarvo+ pakārakaḥ

कामैरहतधीर्दान्तो, मृदुः(श्) शुचिरकिं(ञ्)चनः ।
अनीहो मितभुक् शान्तः(स्), स्थिरो मच्छरणो मुनिः ॥ 30॥

**Kāmairahatadhīrdānto, mṛduḥ(ś) śucirakiṃ(ñ)canaḥ .**

**anīho mitabhuk śāntaḥ(s), sthiro maccharaṇo muniḥ .. 30..**

Kāmai+ rahatadhīr+ dānto, śuci+ rakiṃ(ñ)canaḥ

**अप्रमत्तो गभीरात्मा, धृतिमां(ञ्)जितषड्गुणः ।**

**अमानी मानदः(ख्) कल्पो, मैत्रः(ख्) कारुणिकः(ख्) कविः ॥ 31 ॥**

**apramatto gabhīrātmā, dhṛtimāṃ(ñ)jitaṣaḍguṇaḥ .**

**amānī mānadaḥ(kh) kalpo, maitraḥ(kh) kāruṇikaḥ(kh) kaviḥ .. 31..**

dhṛti+ māṃ(ñ)jita+ ṣaḍguṇaḥ

**आज्ञायैवं(ङ्) गुणान् दोषान्, मयाऽऽदिष्टानपि स्वकान् ।**

**धर्मान् सन्त्यज्य यः(स्) सर्वान्, मां(म्) भजेत स सत्तमः ॥ 32 ॥**

**ājñāyaivaṃ(ṇ) guṇān doṣān, mayā''diṣṭānapi svakān .**

**dharmān santyajya yaḥ(s) sarvān, māṃ(m) bhajeta sa sattamaḥ .. 32..**

mayā''+ diṣṭā+ napi, san+ tyajya

**ज्ञात्वाज्ञात्वाथ ये वै मां(म्), यावान् यश्चास्मि यादृशः ।**

**भजन्त्यनन्यभावेन, ते मे भक्ततमा मताः ॥ 33 ॥**

**jñātvājñātvātha ye vai māṃ(m), yāvān yaścāsmi yādṛśaḥ .**

**bhajantyananyabhāvena, te me bhaktatamā matāḥ .. 33..**

jñātvā+ jñātvā+ tha, yaś+ cāsmi, bhajantya+ nanya+ bhāvena

**मल्लिङ्गमद्भक्तजन- दर्शनस्पर्शनार्चनम् ।**

**परिचर्या स्तुतिः(स्) प्रह्व- गुणकर्मानुकीर्तनम् ॥ 34 ॥**

**malliṅgamadbhaktajana- darśanasparśanārcanam .**

**paricaryā stutiḥ(s) prahva - guṇakarmānukīrtanam .. 34..**

malliṅ+ gamad+ bhaktajana,darśana+ sparśa+ nārcanam,

guṇakarmā+ nukīrtanam

मत्कथाश्रवणे श्रद्धा, मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं(न्), दास्येनात्मनिवेदनम् ॥ 35॥

**matkathāśravaṇe śraddhā, madanudhyānamuddhava .**
**sarvalābhopaharaṇaṃ(n), dāsyenātmanivedanam .. 35..**

madanudhy**ā+** namuddhava, sarval**ā**bho+ pahara**ṇ**a**ṃ**(n),
d**ā**syen**ā**t+ manivedanam

मज्जन्मकर्मकथनं(म्), मम पर्वानुमोदनम् ।
गीतताण्डववादित्र- गोष्ठीभिर्मद्गृहोत्सवः ॥ 36॥

**majjanmakarmakathanaṃ(m), mama parvānumodanam .**
**gītatāṇḍavavāditra- goṣṭhībhirmadgṛhotsavaḥ .. 36..**

majjanma+ karmakathana**ṃ**(m), parv**ā+** numodanam,
g**ī**ta+ t**āṇḍ**a+ vav**ā**ditra- go**ṣṭ**h**ī**bhir+ mad+ g**ṛ**hotsava**ḥ**

यात्रा बलिविधानं(ञ्) च, सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा, मदीयव्रतधारणम् ॥ 37॥

**yātrā balividhānaṃ(ñ) ca, sarvavārṣikaparvasu .**
**vaidikī tāntrikī dīkṣā, madīyavratadhāraṇam .. 37..**

sarva+ v**ā**r**ṣ**i+ kaparvasu, mad**ī+** yavrata+ dh**ā**ra**ṇ**am

ममार्चास्थापने श्रद्धा, स्वतः(स्) सं(व्)हत्य चोद्यमः ।
उद्यानोपवनाक्रीड- पुरमन्दिरकर्मणि ॥ 38॥

**mamārcāsthāpane śraddhā, svataḥ(s) saṃ(v)hatya codyamaḥ .**
**udyānopavanākrīḍa, puramandirakarmaṇi .. 38..**

mam**ā**r+ c**ā**sth**ā**pane, udy**ā**no+ pavan**ā+** kr**īḍ**a, puramandi+ rakarma**ṇ**i

सम्मार्जनोपलेपाभ्यां(म्), सेकमण्डलवर्तनैः ।
गृहशुश्रूषणं(म्) मह्यं(न्), दासवद् यदमायया ॥ 39॥

**sammārjanopalepābhyāṃ(m), sekamāṇḍalavartanaiḥ .**

**gṛhaśuśrūṣaṇaṃ(m) mahyaṃ(n), dāsavad yadamāyayā .. 39..**

sammār+ jano+ palepābhyāṃ(m), sekamaṇḍa+ lavartanaiḥ, gṛha+ śuśrū+ ṣaṇaṃ(m)

**अमानित्वमदम्भित्वं(ङ्), कृतस्यापरिकीर्तनम् ।**

**अपि दीपावलोकं(म्) मे, नोपयुञ्ज्यान्निवेदितम् ॥ 40॥**

**amānitvamadambhitvaṃ(ṅ), kṛtasyāparikīrtanam .**

**api dīpāvalokaṃ(m) me, nopayuñjyānniveditam .. 40..**

amā+ nitva+ madam+ bhitvaṃ(ṅ), kṛtasyā+ parikīrtanam, dīpā+ valokaṃ(m),

nopa+ yuñjyān+ niveditam

**यद् यदिष्टतमं(म्) लोके, यच्चातिप्रियमात्मनः ।**

**तत्तन्निवेदयेन्मह्यं(न्), तदानन्त्याय कल्पते ॥ 41॥**

**yad yadiṣṭatamaṃ(m) loke, yaccātipriyamātmanaḥ .**

**tattannivedayenmahyaṃ(n), tadānantyāya kalpate .. 41..**

yaccāti+ priya+ mātmanaḥ, tat+ tan+ niveda+ yen+ mahyaṃ(n), tadā+ nanty

**सूर्योऽग्निर्ब्राह्मणो गावो, वैष्णवः(ख्) खं मरुज्जलम् ।**

**भूरात्मा सर्वभूतानि, भद्र पूजापदानि मे ॥ 42॥**

**sūryo'gnirbrāhmaṇo gāvo, vaiṣṇavaḥ(kh) khaṃ marujjalam .**

**bhūrātmā sarvabhūtāni, bhadra pūjāpadāni me .. 42..**

sūryo'gnir+ brāhmaṇo

**सूर्ये तु विद्यया त्रय्या, हविषाग्नौ यजेत माम् ।**

**आतिथ्येन तु विप्राग्र्ये, गोष्वं(ङ्)ग यवसादिना ॥ 43॥**

**sūrye tu vidyayā trayyā, haviṣāgnau yajeta mām .**

**ātithyena tu viprāgrye, goṣvaṃ(ṅ)ga yavasādinā .. 43..**

वैष्णवे बन्धुसत्कृत्या, हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये, द्रव्यैस्तोयपुरस्कृतैः ॥ 44॥

**vaiṣṇave bandhusatkṛtyā, hṛdi khe dhyānaniṣṭhayā .**
**vāyau mukhyadhiyā toye, dravyaistoyapuraskṛtaiḥ .. 44..**

bandhu+ sat+ kṛtyā, dhyā+ naniṣṭhayā, dravyais+ toya+ puraskṛtaiḥ

स्थण्डिले मन्त्रहृदयैर्- भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं(म्) सर्वभूतेषु , समत्वेन यजेत माम् ॥ 45॥

**sthaṇḍile mantrahṛdayair- bhogairātmānamātmani .**
**kṣetrajñaṃ(m) sarvabhūteṣu, samatvena yajeta mām .. 45..**

bhogai+ rātmā+ namātmani

धिष्ण्येष्वेष्विति मद्रूपं(म्), शङ्खचक्रगदाम्बुजैः ।
युक्तं(ञ्) चतुर्भुजं(म्) शान्तं(न्), ध्यायन्नर्चेत् समाहितः ॥ 46॥

**dhiṣṇyeṣveṣviti madrūpaṃ(m), śaṅkhacakragadāmbujaiḥ .**
**yuktaṃ(ñ) caturbhujaṃ(m) śāntaṃ(n), dhyāyannarcet samāhitaḥ .. 46..**

dhiṣṇyeṣ+ veṣviti, śaṅkha+ cakra+ gadāmbujaiḥ, dhyāyan+ narcet

इष्टापूर्तेन मामेवं(म्), यो यजेत समाहितः ।
लभते मयि सद्भक्तिं(म्), मत्स्मृतिः(स्) साधुसेवया ॥ 47॥

**iṣṭāpūrtena māmevaṃ(m), yo yajeta samāhitaḥ .**
**labhate mayi sadbhaktiṃ(m), matsmṛtiḥ(s) sādhusevayā .. 47..**

प्रायेण भक्तियोगेन , सत्सं(ङ्)गेन विनोद्धव ।
नोपायो विद्यते सध्र्यङ्- प्रायणं(म्) हि सतामहम् ॥ 48॥

**prāyeṇa bhaktiyogena, satsaṃ(ṅ)gena vinoddhava .**
**nopāyo vidyate sadhryaṅ- prāyaṇaṃ(m) hi satāmaham .. 48..**

अथैतत् परमं(ङ्) गुह्यं(म्), शृण्वतो यदुनन्दन ।
सुगोप्यमपि वक्ष्यामि , त्वं(म्) मे भृत्यः(स्) सुहृत् सखा ॥ 49॥

Athaitat paramaṃ(ṅ) guhyaṃ(m), śṛṇvato yadunandana .
sugopyamapi vakṣyāmi, tvaṃ(m) me bhṛtyaḥ(s) suhṛt sakhā .. 49..

sugop+ yamapi

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायामेकादशस्कन्धे एकादशोऽध्यायः ॥11॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃsyāṃ
saṃhitāyāṃ ekādaśaskandhe ekādaśo'dhyāyaḥ .. 11..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|
Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||
Om Shāntih(ś) Shāntih(ś) Shāntih ||

